द्वादशः पाठः

# अजेयो हि उत्साहसम्पन्नः

**विष्णुशर्मणा प्रणीताः पञ्चतन्त्रीयाः कथाः लोके अतीवप्रसिद्धाः। उत्साहसम्पन्नो जनः स्वकीयेन प्रयत्नेन कठिनतरमपि कार्यं साधयितुं शक्नोति। निरुत्साही प्रयत्नं विहाय सर्वत्र पराभवं प्राप्नोप्तीति भावं शिक्षयितुमेषा कथा पञ्चतन्त्रस्य मित्रभेदात् सङ्कलिता अस्ति। एतस्यां कथायां समुद्रः टिट्टिभ्याः अण्डानि जहार। तदनन्तरं टिट्टिभः प्रयासेन अण्डानि प्राप्तवान् यतोहि ''प्रयासेन सर्वं सिध्यति'' इति कथायां प्रस्तूयते।**

अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाष्टिट्टिभ्याः समुद्रो वेलाव्याजेन अण्डान्यपजहार। अथायाता सा टिट्टिभी प्रसवस्थानं शून्यमवलोक्य, प्रलपन्ती टिट्टिभमूचे-''भो ! कथितमासीन्मया ते यत्समुद्रवेलया विनाशो भविष्यति, तद् दूरतरं व्रजावः। परं मूढतयाहङ्कारमाश्रित्य मम वचनं न करोषि।''



तत् श्रुत्वा टिट्टिभ आह - ''भद्रे ! किं मां यद्भविष्यसदृशं सम्भावयसि ? तत्पश्य मे बुद्धिप्रभावं, यावदेनं दुष्टसमुद्रं स्वचञ्च्वा शोषयामि।''

टिट्टिभ्याह - ''अहो, कस्ते समुद्रेण सह विग्रहः ? तन्न युक्तमस्योपरि कोपं कर्तुम्। उक्तञ्च -

**अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः।**
**गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥**

टिट्टिभ आह - ''प्रिये ! मा मैवं वद। येषामुत्साहशक्तिर्भवति ते स्वल्पा अपि गुरुन्विक्रमन्ते।''

टिट्टिभ्याह - ''भोः कान्त ! यत्र जाह्नवी नवनदीशतानि गृहीत्वा नित्यमेव प्रविशति, तथा सिन्धुश्च। तत्कथं त्वमष्टादशनदीशतैः पूर्यमाणं तं विप्रुष्वाहिन्या चञ्च्वा शोषयिष्यसि; तत्किमश्रद्धेयेनोक्तेन ?'' यदि त्वयाऽवश्यं समुद्रेण सह विग्रहानुष्ठानं कार्यं, तदन्यानपि विहङ्गमानाहूय सुहृज्जनसहित एवं समाचर।

टिट्टिभ आह - ''भद्रे ! एवं भवतु। सुहृद्वर्गसमुदायेन समुद्रं शोषयिष्यामि।'' इति निश्चित्य बकसारसमयूरादीन्समाहूय प्रोवाच- ''भोः ! पराभूतोऽहं समुद्रेणाण्डकापहारेण। तच्चिन्त्यतामस्य शोषणोपायः।''

ते संमन्त्र्य प्रोचुः - ''अशक्ता वयं समुद्रशोषणे, तत्किं वृथा प्रयासेन ? तस्मादस्माकं स्वामी वैनतेयोऽस्ति, तत्तस्मै सर्वमेतत्परिभवस्थानं विनिवेद्यतां येन स्वजातिपरिभवकुपितो वैरानृण्यं गच्छति। तद्यामो वैनतेयसकाशं यतोऽसावस्माकं स्वामी।''

तथाऽनुष्ठिते सर्वे ते पक्षिणो विषण्णवदना वाष्पपूरितदृशो वैनतेयसकाशमासाद्य करुणस्वरेण फूत्कर्तुमारब्धवन्तः - अहो, अब्रह्मण्यम् ! अधुना सदाचारस्य टिट्टिभस्य भवति नाथे सति समुद्रेणाऽण्डान्यपहृतानि। तत्प्रणष्टमधुना पक्षिकुलम्। अन्येऽपि स्वेच्छया समुद्रेण व्यापादयिष्यन्ते।

अथैवं गुरुडः समाकर्ण्य तद्दुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत् - ''अहो, सत्यमुक्तमेतैः पक्षिभिः । तदद्य गत्वा तं समुद्रं शोषयामः ।'' भगवन्तं महाविष्णुं प्रणम्य गरुडः उवाच । भगवन् भगवदाश्रयोन्मत्तेन सागरेण मम भृत्यस्याण्डान्यपहृतानि । तद्रक्ष्यतामस्माकं खगकुलम् ।

तत् श्रुत्वा भगवानाह - ''भो वैनतेय ! सत्यमभिहितं भवता । तदागच्छ, येनाण्डानि समुद्रादादाय टिट्टिभं सम्भावयावः अमरावतीं च गच्छावः । तथा अनुष्ठिते समुद्रो भगवता निर्भत्स्याग्नेयं शरं सन्धायाभिहितः - ''भोः ! दुरात्मन् ! दीयन्तां टिट्टिभाण्डानि, नो चेत्स्थलतां त्वां नयामि ।''

ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि प्रदत्तानि । टिट्टिभेनापि भार्यायै समर्पितानि । उक्तञ्च -

**शत्रोर्विक्रममज्ञात्वा वैरमारभते हि यः ।**
**स पराभवमाप्नोति समुद्रष्टिट्टिभाद्यथा ॥**

## शब्दार्थः

आसाद्य - प्राप्य । समाकर्षति - आकृष्टं करोति । मात्रा - शक्तिः । वेलाव्याजेन - प्रवाहछलेन (तरङ्गव्याजेन) । व्रजावः - विचरणं कुर्वः, गच्छावः । विप्रुष्वाहिन्या - बिन्दुमात्रधारिण्या । विग्रहः - युद्धः । समाहूय - आकार्य । संमन्त्र्य - परस्परं विचार्य । वैरानृण्यम् - वैरस्य अनृण्यताम् । विषण्णवदना - खिन्नाननाः । दूषयिष्यति - समाहरिष्यति । प्राणयात्रार्थम् - जीविकोपार्जनार्थम् । संभावयसि - मन्यसे । गुरुन् - सशक्तान् । पराभवस्थानम् - तिरस्कारविषयम् । फूत्कर्तुमारब्धवन्तः - रोदितुम् आरब्धवन्तः (रोना प्रारम्भ कर दिया) । संभावयावः - संमानयावः ।

## अभ्यासः

1. **एकपदेन उत्तरत -**

(क) प्रसवस्थानं कीदृशम् अवलोक्य टिट्टिभी विलापं कृतवती ?

(ख) कस्ते समुद्रेण सह विग्रहः इति का उक्तवती ?

(ग) विष्णुः कं शरं सन्धानमकरोत् ?

(घ) टिट्टिभयूथपस्य स्वामी कः ?

2. **एकवाक्येन उत्तरत -**

(क) विष्णुः समुद्रं निर्भत्स्य किमकथयत् ?

(ख) समुद्रः केन व्याजेन अण्डानि अपजहार ?

(ग) टिट्टिभः कान् समाहूय प्रोवाच ?

(घ) भगवन्तं महाविष्णुं प्रणम्य गरुडः किम् उवाच ?

**3. रिक्तस्थानानि पूरयत -**

(क) भो: ! दुरात्मन् ! दीयन्तां ...................... ।

(ख) वैनतेय: टिट्टिभयूथपस्य ...................... अस्ति ।

(ग) पक्षिणो .......................... वाष्पपूरितमासीत् ।

(घ) .......................... आहूय टिट्टिभ: प्रोवाच ।

**4. युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | खगकुलम् | वैनतेय: |
| (ख) | दीयन्ताम् | पक्षिण: |
| (ग) | चञ्च्वा | रक्ष्यताम् |
| (घ) | पक्षिणां स्वामी | टिट्टिभाण्डानि |
| (ङ) | विषण्णवदना: | विप्रुष्वाहिन्या |

**5. अधोलिखितपदानां विभक्तिं वचनञ्च लिखत -**

(क) अमरावतीम्

(ख) समुद्रेण

(ग) स्वेच्छया

(घ) मम

(ङ) त्वया

**6. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| गच्छाव: | | | | |
| नयामि | | | | |
| हर | | | | |
| शोषयामि | | | | |
| दूषयिष्यति | | | | |

7. **प्रकृतिप्रत्ययौ पृथक् कुरुत –**

(क) श्रुत्वा

(ख) संमन्त्र्य

(ग) गन्तुम्

8. **सन्धिविच्छेदमाधृत्य सन्धिं कुरुत –**

(क) सा + आह = .................. ।

(ख) तत् + श्रुत्वा = .................. ।

(ग) गतायाः + टिट्टिभ्याः = .................. ।

(घ) आसीत् + मया = ................... ।

(ङ) त्वया + अवश्यम् = ................... ।

9. **अधोलिखितानि अव्ययानि अधिकृत्य वाक्यनिर्माणं कुरुत –**

(क) ततः

(ख) अथ

(ग) अधुना

(घ) चेत्

(ङ) मा

10. **अधोलिखितश्लोकयोः भावार्थं लिखत –**

(क) शत्रोर्विक्रममज्ञात्वा वैरमारभते हि यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभाद्यथा ॥

(ख) अविदित्वात्मानः शक्तिं परस्य च समुत्सुकः ।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥

## योग्यताविस्तारः –

- शिक्षाप्रदाः अन्याः कथाः सङ्ग्रहणीयाः ।
- संस्कृतभाषया कथायाः सारः लेखनीयः ।